एतान्यौषधजातानि धूपितानि महेश्वर ! ।
निघ्नन्ति रोगजातानि वृत्रमिन्द्राशनिर्यथा ॥”
इति गारुडे १६६ अध्यायः ॥
( यथा,—
“पुरध्यामवचासर्ज्जनिम्बार्काগুরুदारुभिः ।
सर्व्वज्वरहरो धूपः कार्य्योऽयमपराजितः ॥”
इति वैद्यकचक्रपाणिसंग्रहे ज्वराधिकारे ॥ )
षड़ङ्गधूपो यथा,—
“गुग्गुल्वगुरुउशीरशर्करामधुचन्दनैः ।
धूपयेदाज्यसंमिश्रैर्नौचैर्देवस्य देशिकः ॥”
अन्यच्च ।
“सिताज्यमधुसंमिश्रं गुग्गुल्वगुरुचन्दनम् ।
षड़ङ्गधूपमेतत्तु सर्व्वदेवप्रियं सदा ॥”
दशाङ्गो यथा,—
“रोगरोगहरीरोगदकेशाः
सुरतरुजतुलघुपत्रविशेषाः ।
वक्रविवर्ज्जितवारिजसुद्रा
धूपवर्त्तिरिह सुन्दरि ! भद्रा ॥”
अन्यच्च ।
“मधु मुस्तं घृतं गन्धो गुग्गुलागुरुशैलजम् ।
सरलं सिह्नसिद्धार्थं दशाङ्गो धूप उच्यते ॥”
षोड़शाङ्गो यथा,—
“गुल्गुलुं सरलं दारु पत्रं मलयसम्भवम् ।
ह्रीवेरमगुरुं कुष्ठं गुड़ं सर्ज्जरसं घनम् ॥
हरीतकीं नखीं लाक्षां जटामांसीञ्च शैलजम् ।
षोड़शाङ्गं विदुर्धूपं दैवे पित्र्ये च कर्म्मणि ॥”
इति तन्त्रसारः ॥ * ॥
केशवार्च्चायां षोड़शाङ्गधूपो यथा,—
“मुस्तकं गुग्गुलुः कुष्ठं कर्पूरं मलयोद्भवम् ।
देवदारु जटामांसी जातीकोषञ्च वालकम् ॥
सुरा मांसी ह्यगुरुकं त्वगुशीरञ्च केशरम् ।
एला तथा तेजपत्रं सर्व्वमेतद्घृताक्तकम् ॥
धूपोऽयं षोड़शाङ्गः स्याद्गोविन्दप्रीतिकारकः ॥”
द्वादशाङ्गो यथा,—
“गुग्गुलुश्चन्दनं पत्रं कुष्ठञ्चागुरु कुङ्कुमम् ।
जातीकोषञ्च कर्पूरं जटामांसी च वालकम् ।
त्वगुशीरञ्च धूपोऽसौ द्वादशाङ्गः प्रकीर्त्तितः ॥”
दशाङ्गो यथा,—
“कर्पूरं कुष्ठमगुरु गुग्गुलुर्मलयोद्भवम् ।
केशरं वालकं पत्रं त्वग्जातीकोषमुत्तमम् ॥
सर्व्वमेतद्घृतयुतं दशाङ्गो धूप ईरितः ॥”
अष्टाङ्गो यथा,—
“गुग्गुल्वगुरुकं तेजपत्रं मलयसम्भवम् ।
कर्पूरं वालकं कुष्ठं नूतनं कुङ्कुमं तथा ॥
अष्टाङ्गः कथितो धूपो गोविन्दप्रीतिदः शुभः ॥”
पञ्चाङ्गो यथा,—
“चन्दनं कुङ्कुमं नूलं कर्पूरं गुग्गुलोऽगुरु ।
धूपोऽयं घृतसंयुक्तः पञ्चाङ्गः समुदाहृतः ॥”
मुकुन्दधूपे वर्ज्जनीयद्रव्यम् । यथा,—
“ऐक्षवं शालनिर्य्यासं पद्मकं सरलञ्च तु ।
वचा मधुरिका तैलं गन्धकाष्ठं कलम्बकम् ॥
गन्धकं टङ्कणं तालं हिङ्गुलञ्च मनःशिला ।
कक्कोलञ्चूषरं दार्व्वीं गन्धमाद्री रसाञ्जनम् ॥
अष्टवर्गः शटी मेथी शिलाजिज्जन्त्वचन्दनम् ।
कुन्दुरू रेणुकं रास्नाजमोदा शतपुष्पिका ॥
हरिद्रा जीरकं वृश्चीरञ्च रक्तचन्दनम् ।
कर्च्चूरकं मरुवकं यवानी ग्रन्थिकान्तथा ॥
शैलजं धातकीपुष्पं नखी मोचरसादिकम् ।
मुकुन्दधूपे देवर्षे ! सर्व्वमेतद्विवर्ज्जयेत् ॥”
इति पाद्मोत्तरखण्डम् ॥
धूपदानविधिर्यथा,—
“मध्यमानामिकाभ्यान्तु मध्यपर्व्वणि देशिकः ।
अङ्गुष्ठाग्रेण देवेशि ! धृत्वा धूपं निवेदयेत् ॥
धूपस्थानं समभ्यर्च्च्य तर्ज्जन्या वामयास्पृशन् ।
धूपभाजनमस्त्रेण प्रोक्ष्याभ्यर्च्च्य हृदाणुना
उत्तीर्य्य हृदिपर्य्यन्तं घण्टां वामदिशि स्थिताम् ॥
वादयन् वामहस्तेन दक्षहस्तेन चार्पयेत् ॥”
इति तन्त्रसारः ॥
गन्धमाल्यमदत्त्वा धूपदाने दोषो यथा,—
“अदत्त्वा गन्धमाल्यानि यो मे धूपं प्रयच्छति ।
कूणपो जायते भूमे यातुधानो न संशयः ॥
वर्षाणि चैकविंशानि अयस्कारनिवासकः ।
तिष्ठतेऽत्र महाभागे ! एवमेतन्न संशयः ॥”
इति वराहपुराणम् ॥ * ॥
विषघ्नधूपो यथा,—
“सक्तुः सर्ज्जरसोपेतः सर्षपा एलवालुकैः ।
सुवर्णा तस्करतरोः कुसुमैरर्ज्जुनस्य तु ॥
धूपो वासगृहे हन्ति विषं स्थावरजङ्गमम् ।
न तत्र कीटा न विषं न दर्दुरसरीसृपाः ॥
न कृत्या कर्म्मणस्तत्र धूपोऽयं यत्र दह्यते ॥” * ॥
सर्पनिर्म्मोचनधूपो यथा,—
“कार्पासास्थिभुजङ्गस्य यथा निर्म्मोचनं भवेत् ।
सर्पनिर्म्मोचनो धूपः प्रशस्तः सततं गृहे ॥”
इति मत्स्यपुराणे १६२ अध्यायः ॥

धूपनः, पुं, ( धूपयति संधुक्षयति वह्निमिति । धूप + ल्युः । ) शालवृक्षनिर्यासः । धूना इति भाषा । तत्पर्य्यायः । शालवेष्टः २ सर्ज्जरसः ३ वह्निवल्लभः ४ । इति शब्दमाला ॥ ( यथा, मनुः । ७ । २१९ ।
“परीक्षिताः स्त्रियश्चैनं व्यजनोदकधूपनैः ।
वेषाभरणसंशुद्धाः स्पृशेयुः सुसमाहिताः ॥”
क्ली, धूप + ल्युट् । धूपादिना सन्धुक्षणम् । यथा, महाभारते । १३ । ९९ । ७ ।
“अग्निकार्य्याणि समिधः कुशाः सुमनसस्तथा ।
बलयश्चान्नलाजाभिर्धूपनं दीपकर्म्म च ॥” )

धूपवृक्षः, पुं, ( धूपोत्पादको वृक्षः । ) सरलवृक्षः । इति त्रिकाण्डशेषः ॥ ( सरलशब्देऽस्य विवरणं ज्ञातव्यम् ॥ )

धूपवृक्षकः, पुं, ( धूपवृक्ष + स्वार्थे कन् । ) सरलवृक्षः । इति शब्दरत्नावली ॥

धूपागुरु, क्ली, ( धूपाय सन्धुक्षणाय यदगुरु । ) दाहागुरु । इति राजनिर्घण्टः ॥

धूपाङ्गः, पुं, ( धूपसाधनमङ्गं यस्य । ) श्रीवेष्टः । इति राजनिर्घण्टः ॥

धूपायितः, त्रि, ( धूप्यते स्मेति । धूप सन्तापे + “आयादय आर्धधातुके वा ।” ३ । १ । ३१ । इति आयः । ततः क्तः । ) सन्तप्तः । अध्वादिना श्रान्तः । इत्यमरभरतौ ॥ दत्तधूपगृहादि । यथा, तन्त्रप्रमोदे ।
“प्रदीपपरिदीपिते विविधधूपधूपायिते ॥”

धूपार्हं, क्ली, ( धूपाय अर्हति पूज्यते इति । अर्ह पूजायाम् + घञ् । ) कृष्णागुरु । इति राजनिर्घण्टः ॥ धूपयोग्ये, त्रि ॥

धूपितः, त्रि, ( धूप्यते स्मेति । धूप + क्तः । ) सन्तापितः । ( यथा, हरिभक्तिविलासे ।
“ततो गन्धपवित्रञ्च गृहीत्वा धूपितं बुधः ।
भगवन्तं नमस्कृत्य भक्त्या संप्रार्थयेदिदम् ॥” )
अध्वादिना श्रान्तः । इत्यमरभरतौ ॥ दत्तधूपः । यथा,—
“यवादिना दोहदधूपितो द्रुमः ।”
इति वृक्षायुर्वेदः ॥

धूमः, पुं, (धूनोति धूयते वा । धू ञ कम्पे + “इषियुधीन्धीति ।” उणां १ । १४४ । इति मक् । ) आर्द्रेन्धनप्रभवः । धूँया इति भाषा । तत्पर्य्यायः । अभ्रः २ मरुद्वाहः ३ खतमालः ४ शिखिध्वजः ५ अग्निवाहः ६ तरी ७ । इति त्रिकाण्डशेषः ॥ ( यथा, रघुः । ७ । २६ ।
“हविःशमीपल्लवलाजगन्धी
पुण्यः कृशानोरुदियाय धूमः ॥” )
अस्य गुणः । वातपित्तवृद्धिकारित्वम् । इति राजवल्लभः ॥ स च मेघाञ्जनयोर्जनकः ॥ (यथा, मेघदूते । ५ ।
“धूमज्योतिःसलिलमरुतां सन्निपातः क्व मेघः ॥”
भीमादिवदुत्तरपदलोपे धूमकेतुः । यथा, गर्गः ।
“उल्कापाते च त्रिदिनं धूमे पञ्चदिनानि च ॥”
उद्गारजवायुविशेषः । चोँया ढेँकुर इति भाषा ॥ यथा, आह्निकतत्त्वधृतवचनम् ।
“धूमोद्गारे तथा वान्ते क्षुरकर्म्मणि मैथुने ॥”
चिकित्साविशेषः । यथा,—
“श्वेता ज्योतिष्मती चैव हरितालं मनःशिला ।
गन्धाश्चागुरुपत्राद्या धूमो मूर्द्धविरेचनम् ॥
गौरवं शिरसः शूलं पीनसार्द्धावभेदकौ ।
कर्णाक्षिशूलं कासश्च हिक्काश्वासौ गलग्रहः ॥
दन्तदौर्ब्बल्यमास्रावः स्रोतोघ्राणाक्षिदोषजः ।
पूतिघ्राणास्यगन्धश्च दन्तशूलमरोचकः ॥
हनुमन्याग्रहः कण्डूः क्रिमयः पाण्डुता मुखे ।
श्लेष्मप्रसेको वैस्वर्य्यं गलशुण्ड्युपजिह्विका ॥
खालित्यं पिञ्जरत्वञ्च केशानां पतनन्तथा ।
क्षवथुश्चातितन्द्रा च बुद्धेर्मोहोऽतिनिद्रता ॥
धूमपानात् प्रशाम्यन्ति बलं भवति चाधिकम् ।
शिरोरुहकपालानामिन्द्रियाणां स्वरस्य च ॥”
“स्नात्वा भुक्त्वा समुल्लिख्य क्षुत्वा दन्तान्
विघृष्य च ।
नावनाञ्जननिद्रान्ते चात्मवान् धूमपो भवेत् ॥
तथा वातकफात्मानो न भवन्त्यूर्द्ध्वजत्रुजाः ।
रोगास्तस्य तु पेयाः स्युरापानाश्छिस्त्रयस्त्रयः ॥